This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-204

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय

हस्तलिखित संग्रह

दाखल क्र. M204 विषय वैदिक कर्मकांड

नांव न्यासविधी.

लेखक / लिपीकार —

पृष्ठ 11 काळ — ~~पूर्ण~~ / अपूर्ण

M-204

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥न्यासप्रारंभः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पा॰ र॰ श्रीगणे[...]नमः॥ ॥अथातः पंचांगरुद्राणां न्यासपूर्वकं उपहो
मार्जनाप[...]यं व्याख्यास्यामः॥ ॥ॐ या ते रुद्र शिवा तनूः॰ शिखायै नमः॥
अस्मिन्महत्यर्णवे॰ शिरसे॰॥ सहस्राणि सहस्रशो ये॰ ललाटाय॰॥
हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ न
षद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्॥
भ्रूमध्याय॰॥ त्र्यंबकं यजामहे॰॥ नेत्राभ्यां॰॥ नमस्स्रुत्याय च पथ्या
य च॥ कर्णाभ्यां॰॥ मा नस्तोके॰ नासिकायै॰॥ अवतत्य धनुस्त्वं॰
मुखाय॰॥ नीलग्रीवाः शितिकंठाः शर्वा अधः क्षमाचराः॥ तेषां॰
नीलग्रीवाः शितिकंठा दिवं रुद्रा उपश्रिताः॥ तेषां॰॥ कंठाय न राम
मः॥ नमस्ते अस्त्वायुधाय॰ बाहुभ्यां॰॥ या ते हेतिर्मीढुष्टम॰ उप ॥१॥

भ्यां॰॥ ये तीर्थानि प्रचरंति॰ हस्ताभ्यां॰॥ सद्योजातं प्रपद्यामि॰
गुष्ठाभ्यां॰॥ वामदेवाय नमो॰ तर्जनीभ्यां॰॥ अघोरेभ्यो॰ मध्य
माभ्यां॰॥ तत्पुरुषाय विद्महे॰ अनामिकाभ्यां॰॥ ईशानः सर्वविद्या
ना॰ कनिष्ठिकाभ्यां॰॥ नमो वः किरिकेभ्यो॰ हृदयाय॰॥ नमो ग
णेभ्यो॰ पृष्ठे॰॥ नमो हिरण्यबाहवे॰ पार्श्वाभ्यां॰॥ विज्यं धनुः क
पर्दिनो॰ जठराय॰॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः प
तिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हवि
षा विधेम॥ नाभ्यै॰॥ मीढुष्टम॰ कट्यै॰॥ यो भूतानामधिपतयो॰
गुह्याय॰॥ स शिरा जातवेदाः॥ अक्षरं ब्रह्मसंमितं॥ वेदानां शि र
रस्तमं॥ जातवेदसे शिरसा माता स्वयं ब्रह्म[...] भुवः स्वरों॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः॥सनःपर्ष
दतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥तामग्निवर्णांतप
साज्वलंतींवैरोचनीकर्मफलेषुजुष्टां॥दुर्गांदेवींशरणमहंप्र
पद्येसुतरसितरसेनमः॥अग्नेत्वंपारयानव्योअस्मान्स्वस्तिभिर
तिदुर्गाणिविश्वा॥पूश्चपृथ्वीबहुलानउर्वीभवातोकायतनया
यशंयोः॥विश्वानिनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपः
र्षि॥अग्नेअत्रिवन्मनसागृणानोस्माकंबोध्यवितातनूनां॥प
तनाजितंसहमानमुग्रमग्निंहुवेमपरमात्सधस्थात्॥सनःप
र्षतिदुर्गाणिविश्वाक्षामद्देवोअतिदुरितात्यग्निः॥अयानाय०॥ राम
प्रहांत०ऊरुभ्यां०॥एषतेरुद्रभाग०जानुभ्यां०॥संसृष्ट ॥२॥

नामासंनापात्रंजनयंतदेवाः॥हृदयाय०॥मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनाभिवस्तां॥उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः॥मुखाय०॥जातवेदायदिवापावकोसिवैश्वानरोयदिवावैद्युतोसि॥शंप्रजाभ्योयजमानायलोकंऊर्जंपुष्टिंददद्भ्यावववृत्स्व॥शिरसे०॥आत्मरक्षाकर्तव्या॥ब्रह्मासंन्वदसृजत॥तदकामयत॥समात्मनापद्येयेति॥आत्मन्नात्मंनिसामंत्रयत॥तस्मैदशमंहूतःप्रत्यशृणोत्॥सदशहूतोभवत्॥दशहूतोहवैनामैषः॥तंवाएतंदशहूतंसंतं॥दशहोतेत्याचक्षतेपरोक्षेण॥परोक्षप्रियाइवहिदेवाः॥आत्मन्नात्मंनिसामंत्रयत॥तस्मैसप्तमंहूतःप्रत्यशृणोत्॥ससप्तहूतोभवत्॥सप्तहूतोहवैनामैषः॥तंवाएतंसप्तहूतंसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रास ॥५॥ तां सप्तहोतेत्याचक्षते। तस्मै षष्ठꣳहूतः प्रत्यशृणोत्। स षड्ढूतोऽभवत्। ष
ड्ढूतो ह वै नामैषः। तं वा एतꣳ षड्ढूतꣳ सन्तं षड्ढोतेत्याचक्षते। तस्मै पञ्चमꣳहू
तः प्रत्यशृणोत्। स पञ्चहूतोऽभवत्। पञ्चहूतो ह वै नामैषः। तं वा एतं पञ्च
हूतꣳ सन्तं पञ्चहोतेत्याचक्षते। तस्मै चतुर्थꣳहूतः प्रत्यशृणोत्। स चतुर्हूतोऽभ
वत्। चतुर्हूतो ह वै नामैषः। तं वा एतं चतुर्हूतꣳ सन्तं चतुर्होतेत्याचक्षते॥
तमब्रवीत्। त्वं वै मे नेदिष्ठꣳहूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार इति।
तस्मान्नु हैनाꣳश्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्राणाꣳहृ
द्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद॥५॥
यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति। दूरंगमं ज्योतिषां ज्यो राम
तिरेकं तन्मे मनः शिवसंकल्पमस्तु॥ येन कर्माण्यपसो मनीषिणो ॥५॥
यज्ञे कृण्वन्ति विदथेषु धीराः। यदपूर्वं यक्षमन्तः प्रजानां तन्मे०॥ य
त्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किं
चन कर्म क्रियते तन्मे०॥ येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन स
र्वं। येन यज्ञस्तायते सप्तहोता तन्मे०॥ यस्मिन्नृचः साम यजूꣳषि य
स्मिन्प्रतिष्ठिता रथनाभाविवाराः। यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजा
नां तन्मे०॥ सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजि
न इव। हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे०॥ हृदयाय०॥ सहस्रशीर्षा पु
रुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्द
शांगुलं॥ पुरुष एवेदꣳ सर्वं। यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानो।
यदन्नेनातिरोहति॥ एतावानस्य महिमा। अतो ज्यायाꣳश्च पूरुषः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रास पादोस्यविश्वाभूतानि। त्रिपादस्यामृतंदिवि॥ त्रिपादूर्ध्वउदैत्पुरुषः।
॥६॥ पादोस्येहाभवात्पुनः॥ ततोविश्वङ्व्यक्रामत्। साशनानशनेअभि॥
तस्माद्विराडजायत। विराजोअधिपूरुषः॥ सजातोअत्यरिच्यत। प
श्चाद्भूमिमथोपुरः॥ यत्पुरुषेणहविषा। देवायज्ञमतन्वत। वसंतोअ
स्यासीदाज्यं। ग्रीष्मइध्मः शरद्धविः॥ सप्तास्यासन्परिधयः। त्रिःसप्त
समिधःकृताः॥ देवायद्यज्ञंतन्वानाः। अबध्नन्पुरुषंपशुं॥ तंयज्ञंबर्हि
षिप्रौक्षन्। पुरुषंजातमग्रतः॥ तेनदेवाअयजंत। साध्याऋषयश्च
ये॥ तस्माद्यज्ञात्सर्वहुतः। संभृतंपृषदाज्यं॥ पशूंस्तांश्चक्रे। वायव्या
न्। आरण्यान्ग्राम्याश्चये॥ तस्माद्यज्ञात्सर्वहुतः। ऋचःसामानिज राम
ज्ञिरे। छंदांसिजज्ञिरेतस्मात्। यजुस्तस्मादजायत॥ तस्मादश्वाअ ॥६॥

जायंत। येकेचोभयादतः॥ गावोहजज्ञिरेतस्मात्। तस्माज्जाताअ
जावयः॥ यत्पुरुषंव्यदधुः। कतिधाव्यकल्पयन्॥ मुखंकिमस्यकौ
बाहू। काऊरूपादाउच्येते॥ ब्राह्मणोस्यमुखमासीत्। बाहूराजन्यः
कृतः॥ ऊरूतदस्ययद्वैश्यः। पद्भ्यांशूद्रोअजायत॥ चंद्रमामनसो
जातः। चक्षोःसूर्योअजायत॥ मुखादिंद्रश्चाग्निश्च। प्राणाद्वायुरजा
यत॥ नाभ्याआसीदंतरिक्षं। शीर्ष्णोद्यौःसमवर्तत॥ पद्भ्यांभूमिर्दि
॥ ७ ॥ शःश्रोत्रात्। तथालोकांअकल्पयन्॥ वेदाहमेतंपुरुषंमहांतं। आ
दित्यवर्णंतमसस्तुपारे॥ सर्वाणिरूपाणिविचित्यधीरः। नामानि
कृत्वाभिवदन्यदास्ते॥ धातापुरस्ताद्यमुदाजहार। शक्रःप्रविद्वा
न्प्रदिशश्चतस्रः॥ तमेवंविद्वानमृतइहभवति। नान्यःपंथाअयना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रास यविद्यते॥यज्ञेनयज्ञमयजंतदेवा:॥तानिधर्माणिप्रथमान्यासन्॥
॥७॥ तेहनाकंमहिमान:सचंते।यत्रपूर्वेसाध्या:संतिदेवा:॥शिरसेस्वाहा
अद्भ्य:संभृत:पृथिव्यैरसाच्च।विश्वकर्मण:समवर्त्तताधि॥तस्यत्व
ष्टाविदधद्रूपमेति।तत्पुरुषस्यविश्वमाजानमग्रे॥वेदाहमेतंपुरुषं
महांतं।आदित्यवर्णंतमस:परस्तात्॥तमेवंविद्वानमृतइहभवति।
नान्य:पंथाविद्यतेयनाय॥प्रजापतिश्चरतिगर्भेअंत:॥अजायमा
नोबहुधाविजायते॥तस्यधीरा:परिजानंतियोनिं।मरीचीनांपद
मिच्छंतिवेधस:॥योदेवेभ्यआतपति।योदेवानांपुरोहित:॥पूर्वो
योदेवेभ्योजात:॥नमोरुचायब्राह्मये॥रुचंब्राह्मंजनयंत:॥देवाअ राम
येतदब्रुवन्।यस्त्वेवंब्राह्मणोविद्यात्।तस्यदेवाअसन्वशे॥ह्रीश्च ॥७॥

लक्ष्मीश्चपत्न्यौ।अहोरात्रेपार्श्वे।नक्षत्राणिरूपं।अश्विनौव्यात्तं।
इष्टंमनीषाण।अमुंमनीषाण।सर्वंमनिषाण॥शिखायैवषट्॥आ
शु:शिशानोवृषभोनयुध्मोघनाघन:क्षोभणश्चर्षणीनां॥संक्रंद
नोनिमिषएकवीर:शतंसेनाअजयत्साकमिंद्र:॥संक्रंदनेनानिमि
षेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥तदिंद्रेणजयततत्सह
ध्वंयुधोनरइषुहस्तेनवृष्णा॥सइषुहस्तै:सनिषंगिभिर्वशीसंस्र
ष्टासयुधइंद्रोगणेन॥संसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्र
तिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहामित्रांअपबाध
मान:॥प्रभंजंत्सेना:प्रमृणोयुधाजयंनस्माकमेध्यविताराथानां॥ ना
गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्मप्रमृणंतमोजसा॥इमंसजा

ग्रास अनुवीरयध्वमिंद्रंसखायोनुसंरभध्वं॥ बलविज्ञायस्थविरः
प्रवीरःसहस्वान्वाजीसहमानउग्रः॥ अभिवीरोअभिसत्वासहोजै जा
॥७॥ जैत्रमिंद्ररथमातिष्ठगोवित्॥ अभिगोत्राणिसहसागाहमानोदायोवी
रःशतमन्युरिंद्रः॥ दुश्च्यवनःपृतनाषाडयुध्योस्माकंसेनाअवतु
प्रयुत्सु॥ इंद्रआसांनेताबृहस्पतिर्दक्षिणायज्ञःपुरएतुसोमः॥ देव
सेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रे॥ इंद्रस्यवृष्णोवरुण
स्यराज्ञआदित्यानांमरुतांशर्धउग्रं॥ महामनसांभुवनच्यवानांघो
षोदेवानांजयतामुदस्थात्॥ अस्माकमिंद्रःसमृतेषुध्वजेष्वस्माकं
याइषवस्ताजयंतु॥ अस्माकंवीराउत्तरेभवंत्वस्मानुदेवाअवताह राम म
वेषु॥ उद्धर्षयमघवन्नायुधान्युत्सत्वनांमामकानांमहांसि॥ उद्वृ ॥८॥ ॥७॥

त्रहन्वाजिनांवाजिनान्युद्रथानांजयतामेतुघोषः॥ उपप्रेतजयता
नरःस्थिरावःसंतुबाहवः॥ इंद्रोवःशर्मयच्छत्वनाधृष्यायथासथ॥ अ
वसृष्टापरापतशरव्येब्रह्मसंशिता॥ गच्छामित्रान्प्रविशमैषांकंच
नोच्छिषः॥ मर्माणितेवर्मभिश्छादयामिसोमस्त्वाराजामृतेनाभिव
स्तां॥ उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः॥ यत्रबाणाः
संपतंतिकुमाराविशिखाइव॥ इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयच्छतु
कवचायहुं॥ त्वमग्नेरुद्रोअसुरोमहोदिवः। त्वंशर्धोमारुतंपृक्षईशि
षे॥ त्वंवातैररुणैर्यासिशंगयः। त्वंपूषाविधतःपासिनुत्मना॥ देवादे
वेषुश्रयध्वं॥ प्रथमाद्वितीयेषुश्रयध्वं। द्वितीयास्तृतीयेषुश्रयध्वं। तृ
तीयाश्चतुर्थेषुश्रयध्वं। चतुर्थाःपंचमेषुश्रयध्वं। पंचमाःषष्ठेषुश्रयध्वं।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यास ॥१०॥

षष्ठाः सप्तमेषुश्रयध्वं। सप्तमा अष्टमेषुश्रयध्वं। अष्टमा नवमेषुश्रयध्वं
नवमादशमेषुश्रयध्वं। दशमा एकादशेषुश्रयध्वं। एकादशा द्वादशेषु
श्रयध्वं। द्वादशास्त्रयोदशेषुश्रयध्वं। त्रयोदशाश्चतुर्दशेषुश्रयध्वं। चतु
र्दशाः पंचदशेषुश्रयध्वं। पंचदशाः षोडशेषुश्रयध्वं। षोडशाः सप्तदशे
षुश्रयध्वं। सप्तदशा अष्टादशेषुश्रयध्वं। अष्टादशा एकोनविंशेषु
श्रयध्वं। एकोनविंशा विंशेषुश्रयध्वं। विंशा एकविंशेषुश्रयध्वं।
एकविंशा द्वाविंशेषुश्रयध्वं। द्वाविंशास्त्रयोविंशेषुश्रयध्वं। त्र
योविंशाश्चतुर्विंशेषुश्रयध्वं। चतुर्विंशाः पंचविंशेषुश्रयध्वं। पं
चविंशाः षड्विंशेषुश्रयध्वं। षड्विंशाः सप्तविंशेषुश्रयध्वं। सप्त
विंशा अष्टाविंशेषुश्रयध्वं। अष्टाविंशा एकोनत्रिंशेषुश्रयध्वं।

राम ॥१०॥

एकोनत्रिंशा त्रिंशेषुश्रयध्वं। त्रिंशा एकत्रिंशेषुश्रयध्वं। एक
त्रिंशा द्वात्रिंशेषुश्रयध्वं। द्वात्रिंशास्त्रयस्त्रिंशेषुश्रयध्वं॥ देवास्त्रि
रेकादशा त्रिस्त्रयस्त्रिंशाः॥ उत्तरे भवत। उत्तरवर्त्मान। उत्तरे सत्वा
नः। यत्काम इदं जुहोमि तन्मे समृध्यतां। वयं स्याम पतयो रयीणां॥
भूर्भुवः स्वः स्वाहा॥ अस्त्राय फट्॥ उरसा शिरसा दृष्ट्या मनसा वचसा
तथा॥ पद्भ्यां कराभ्यां जानुभ्यां साष्टांगं प्रणामो च्यते॥ हिरण्यगर्भः॥
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव॥ य ईशे अस्य द्वि
पदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ ब्रह्म जज्ञानं प्रथमं पुरस्ता
द्विसीमतः सुरुचो वेन आवः॥ स बुध्निया उपमा अस्य विष्ठाः सतश्च
योनिमसतश्च विवः॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां॥ पि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या स
९ १०॥

पृतान्नो भरीमभिः॥उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुनां विष्ठि
तंजगत्॥सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेधशत्रून्॥अग्नेन
यसुपथारायेअस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जु
हुराणमेनोभूयिष्ठांतेनमउक्तिं विधेम॥यातेअग्नेयज्ञियातनूस्तयै
ह्यारोहात्मात्मानं॥अच्छावसूनिकृण्वंनस्मेनर्यापुरूणि॥यज्ञोभूत्वा
यज्ञमासीदस्वांयोनिं॥जातवेदोभुवआजायमानःसक्षयएहि॥यथा
वःस्वाहाग्नयेदाशेमपरीला॥भिर्घृतवद्भिश्चहव्यैः॥तेभिर्नोअग्नेअमि
तैर्महोभिःशतंपूर्भिरायसीभिर्निपाहि॥इमंयमप्रस्तरमाहिसीदांगि रा
रोभिःपितृभिःसंविदानः॥आत्वामंत्राःकविशस्तावहंत्वेनाराजन्ह ७॥
विषामादयस्व॥प्रजननेब्रह्मातिष्ठतु॥पादयोर्विष्णुस्तिष्ठतु॥हस्ते

...तु॥बाह्वोरिंद्रस्तिष्ठतु॥जठरेअग्निस्तिष्ठतु॥हृदयेशिवस्ति
...कंठेवसवस्तिष्ठंतु॥वक्त्रेसरस्वतीतिष्ठतु॥नासिकयोर्वायुस्तिष्ठ
तु॥नयनयोःसूर्याचंद्रमसौतिष्ठेतां॥कर्णयोरश्विनौदेवौतिष्ठेतां॥
ललाटेरुद्रास्तिष्ठंतु॥मूर्ध्न्यादित्यास्तिष्ठंतु॥शिरसिमहादेवस्तिष्ठतु॥
शिखायांचामुंडातिष्ठतु॥पृष्ठेपिनाकीतिष्ठतु॥पुरतःशूलिनीतिष्ठतु
पार्श्वयोःशिवशंकरौतिष्ठेतां॥सर्वतोवायुस्तिष्ठतु॥ततोबहिःसर्व
तोग्निर्ज्वालामालापरिवृतस्तिष्ठंतु॥सर्वेष्वंगेषुसर्वादेवतायथास्था
नंतिष्ठंतु॥मांरक्षंतु॥यजमानंरक्षंतु॥अग्निर्मेवाचिश्रितः॥वाग्घृद
येहृदयंमयि॥अहममृते॥अमृतंब्रह्मणि॥वायुर्मेप्राणेश्रितः॥प्राणो
हृदयेहृदयंमयि॥अहममृते०॥सूर्योमेचक्षुषिश्रितः॥चक्षुर्हृदये०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्या

१९

चंद्रमामेमनसिश्रितः।मनोहृदये॥दिशोमेश्रोत्रेश्रिताः।श्रोत्रं
हृदये॥आपोमेरेतसिश्रिताः।रेतोहृदये॥पृथिवीमेशरारीरेश्रि
ता॥शरीरंहृदये॥ओषधिवनस्पतयोमेलोमसुश्रिताः।लोमा
निहृदये॥इंद्रोमेबलेश्रितः।बलंहृदये॥पर्जन्योमेमूर्ध्निश्रितः।
मूर्धाहृदये॥ईशानोमेमन्यौश्रितः।मन्युर्हृदये॥आत्मामआत्म
निश्रितः।आत्माहृदये॥पुनर्मआत्मापुनरायुरागात्।पुनःप्राणः
पुनराकूतमागात्।वैश्वानरोरश्मिभिर्वावृधानः।अंतस्तिष्ठत्वमृत
स्यगोपाः॥ ॥आराधितोमनुष्येस्त्वंसिद्धैर्देवासुरादिभिः॥आरा राम
धयामिभक्त्यात्वांमांगृहाणमहेश्वर॥आवाहंतुहरयःसचेतसः ॥१२॥
[illegible]केतुमद्भिः॥वाताजरैर्बलवद्भिर्मनोजवैरायाहिशी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 14:34
,TRANSFERRED=2019/09/16 at 14:40:11
,PAGES=11
,TYPE=STD
,NAME=S0001840
,Book Name=M-204-NYASVIDHI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection